याज्या स्थाने भवामित्रो न शेव्यो घृतासुतिरित्येहर हश्वाहर्गणेषु यत्रैतदहः स्या
त्तस्मिन्नीवाल्या अभ्यस्येदित्येके नास्मिन्नहनि केन चित्कस्यचिद्विवाच्यमविवाकय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

औ.उ.२

१८

मिस्येतदाचक्षते तैसंनयेबहिर्वेदिस्वाध्यायप्रयोगोंतवेर्दीत्येकेनव्यंजनेनोपहितेनवार्थः प्र
त्यसित्वा प्रायश्चित्तंजुहुयुरग्नेतमद्याश्वंनस्तोमैरित्याज्यं पंचाक्षरेण विग्रहो दशाक्षरेणा
वर्तारथंयथोत यद्द्येतस्याःस्थानेत्रिकद्रुकेषुमहिषोयवाशिरमितिसरवाय आत्रि
षामहीतितिस्र उष्णिहो मरुत्वां इंद्रेतिमरुत्वतीयं कपानश्चित्र आभुवदित्येतास्तु रथंत
रंपृष्ठं तस्य योनिं शंसेदूहृतश्च गाणगारि ईन्द्रा रात्रे मुग्मान्वयत्वोत्तार्क्ष्येणैकपदा उप
संज्ञास्य ऋगावानमेकपदाः शंसेदिंद्रो विश्वस्य गोपतिरितिचतस्रउत्तमयोपसंतानो
यइंद्र सोमपातमइतिपंक्तुष्णिहो युध्मस्यतइतिनिष्केवल्यं नत्सवितुर्वृणीमहइत्येतस्याः
स्थानेऽभित्यंदेवंसवितारमोण्योरित्युभुक्षण इत्यार्षवं पश्वानतायुमितिहै पदं समिद्ध
मग्निं समिधागिरागृणइतितृचश्चाहु प्रतीकं जातवेदस्यं चतुर्थेन बहु ल्केस्येत राणि

१८

रूत्त्वानिवामदेव्यमग्निष्टोमसामाग्निंनरोदीधितिभिररण्योरितितिस्रोत्रियानुरूपौव
ग्निष्टोमइदमहत्रूर्ध्वं पत्नीसंयाजेभ्यः ॥१२॥ गार्हपत्येजुहुती हरमेहरमधर्मिहध्व
तिरिहस्वधृतिरग्नेवाटूस्वाहावाछिस्याग्नीध्रीयेउपस्तृजन्धरुणं मातरंधरुणो
धयन् ॥ रायस्पोषमिषमूर्जमस्मासुदीधरत्स्वाहेतिसदः प्रसृप्यमानसेनस्तु
वतैयर्हिस्तुतंमन्येताध्वर्यविस्याद्भूयीतहोहोतरितीतरआयंगौः पृश्निरक्रमी
दित्सर्पाश्रुतिस्त्रः पराचीः शस्त्वाव्याख्यास्वरेणचतुर्होतृन्व्याचक्षीतदेवावाऽध्व
र्यौःप्रजापतिगृहपतयःसत्रमासतेहोतास्तथाहोतरित्यध्वर्युःप्रतिगृणात्यवसि
तेवसितेदशास्तुपदेषुतपां चित्तिःस्रुगासी३तं ॥ चित्तमाज्यमासी३तं ॥ वाग्वेदिरा
सी३तं ॥ आधीतंबर्हिरासी३तं ॥ केतोअग्निरासी३तं ॥ विज्ञातमग्नीदासी३तं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ॰उ॰२

१९

प्राणोहविरासी३त्॥ सामाध्वर्युरासी३त्॥ वाचस्पतिर्होतासी३त्॥ मनउपवक्तासी३
त्॥ तेवाएतंग्रहमगृह्णत॥ वाचस्पतेविधेनामन्॥ विधेमतेनाम॥ विधेस्त्वमस्मा
कंनाम्नाद्यांगछ॥ यांदेवाःप्रजापतिगृहपतयऋद्धिमराध्नुवंस्तामृद्धिंरात्स्यामः
स्यपत्रजत्सध्वर्युरथप्रजापतेस्तनूरितरउपांश्वनुद्रवतिप्रत्सोघंचान्नादंचा
न्नपत्नीचभद्राचकल्याणीचानिलयाचापभयाचानाप्ताचानाप्याचानाधृष्या
चाप्रतिधृष्याचापूर्वाचाभ्रातृव्याचेतितन्वोग्निर्गृहपतिरितिहेकस्माहुःसोस्य
लोकस्यगृहपतिर्वायुर्गृहपतिरितिहेकस्माहुःसोंतरिक्षलोकस्यगृहपतिर
सौवैगृहपतिर्योसौतपत्येषपतिर्ऋतवोगृहाः॥ येषांवैगृहपतिंदेवंविद्वान्गृ
हपतिर्भवतिराध्नोतिसगृहपतीराध्नुवंतितेयजमानाः॥ येषांवाअपहतपा

१९

प्मानंदेवंविद्वान्गृहपतिर्भवत्यपसगृहपतिःपाप्मानंहतेपतेयजमानाःपाप्मा
नंघ्नतेध्वर्योक्क्वरात्सैमस्तुञ्चैरेषायाज्यैषवषट्कारेणानुवषट्करोत्सुकंवषट्कारा
नुमंत्रणमरात्स्महोतरित्स्यध्वर्युःप्रत्याहमनसाध्वर्युर्ग्रहंगृहीत्वामनसाभक्षमा
हरतिमानसेषुभक्षेषुमनसोपह्वानभक्षणेमनसात्मानमाप्याय्यौदुंबरींसमन्वार
भ्यवाचंयच्छंस्यानक्षत्रदर्शनात्तत्रान्धरानूपाणींश्चिवकोर्धरन्नूहृन्नूयमानेषु
ध्वर्युमुखाःसमन्वारब्धाःसर्पंत्यातीर्थदेशाद्ध्रुवंतमिंद्रापर्वतापुरोयुधेतिजपंतो
ध्वर्युपथेनेत्येकेदक्षिणस्यहविर्धानस्योपोक्षेणेत्येकेप्राप्यवरान्हुत्वावाचंविसृ
जंतेयदिहोनमकर्मयदत्यरीरिचाम॥ प्रजापतिंतत्पितरमप्येत्वित्यथवाचंनिहृ
वंतेवागेतुवागुपैतुवागुपमैतुवागित्सुत्करदेशेस्कंभस्मण्यांत्रिरोहृत्यवाचंविसृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री·उ·२

२०

जंतैनित्यास्त्विह वाग्विसर्गे एतावत्साग्नं हौत्रकर्मीः न्यत्र महाव्रतात्तदे पाभिमङ्गगाथागी
यतें॥ अतिरात्रश्चतुर्विंशं षळहावभिजित्स्वराः॥ विषुवान्विश्वजिच्चैव छंदोमा दशाम
व्रतं॥ प्रायणीयश्चतुर्विंशोदय्योभिप्लव एव च॥ अभिजित्स्वरसामानो विषुवान्विश्व
जित्तथा॥ छंदोमा दशमं चाह उत्तमं तु महाव्रतं॥ अहीनैकाहःसत्राणां प्रकृतिः समु
दाहृमते॥ यद्यन्यधीयते पूर्वं धीयते तं प्रतिग्रामं त्यहानि पंचविंशति यैवैसंवत्सरो
मितः॥ एतेषामेव प्रभवस्त्रीणि षट्त्रिंशतानि यदितितन्ये केचन छांदोग्येवाध्वर्यवे
वा होत्रामन्त्राः समाम्नातानतान्कुर्यादकृत्स्नत्वाद्धौत्रस्य छंदोगप्रत्येयं स्तोमस्तोत्रि
यः एवं संस्थेत्स्वध्वर्युप्रत्ययं तु व्याख्यानं कामकालदेशाद्दक्षिणानां दीक्षोपसत्प्रस
व संस्थोत्थानानामेतावत्त्वं हविषामुच्चैरुपांशुतायां हविषां चानुपूर्व्यमेतेभ्य एवाहो

२०

श्यौ हीनैकाहानुपश्चात्तरान्व्याख्यास्यामः॥१२॥ एतद्धिदं ब्रह्मचारिणमनिराकृति
नेसंवत्सरावमं चारयित्वा व्रतमनुयुञ्ज्यानुक्रोशिने प्रब्रूयादुत्तरमहर्महानाम्नीरग्र उ
दगयने पूर्वपक्षे श्रोष्यन्बहिर्ग्रामात्स्थालीपाकं तिलमिश्रं श्रपयित्वाचार्याय वेदया
त विदिते व्रते संशयानूर्ध्व द्वालपुमात्राच्छेदा पत्कारितास्युरन्वारब्धे जुहुयादग्नावग्नि
श्चरति प्रविष्ट ऋषीणां पुत्रो अधिराज एष॥ तस्मै जुहोमि हविषा घृतेन मा देवानां मोमु
हद्भागधेयं मो अस्माकं मोमुहद्भागधेयं स्वाहा॥ यातिरश्चीनिपद्यते अहं विधरणी इति॥
तां त्वा घृतस्य धारया यजे संराधनीमहं स्वाहा॥ यस्मै त्वा काम कामाय वयं सम्रा
ड्यजामहे॥ तमस्मभ्यं कामं दत्त्वाथेदं त्वं घृतं पिब स्वाहा॥ अयं नो अग्निर्वरिवः कृ
णोत्वयं मृधः पुर एतु प्रभिंदन्॥ अयं शत्रून्जयतु जर्हृषाणोयं वाजं जयतु वाजसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ॰उ॰२

२१

तौ स्वाहा॥ अस्तृयं त्यै चानुमत्यै च स्वाहा॥ प्रदात्रे स्वाहा॥ व्याहृतिभिश्च चरुं घृ
त्वाहितं स्थालीपाके सर्वमन्त्रानेति भुक्तवन्तमपामंजलिपूर्णमादित्यमुपस्थाप
येत्त्वं व्रतानां व्रतपतिरसि व्रतं चरिष्यामि तच्छकेयं तेन राध्यासमिति स
माप्य संमील्य वाचंयमस्तं कालमभिसमीक्षमाणो यदा समयिष्यंदाचार्येणोक्तरा
त्रमध्यायोपपादनात्त्रिरात्रं वा निःस्वाध्यायेन तमेव कालमभिसमीक्षमाण आ
चार्येहितेन वाससा त्रिः प्रदक्षिणं शिरः समुखं वेष्टयित्वाहितं कालमेवं भूतो स्वप
न्नेवेति तं कालमस्वपन्नासीतानुवक्ष्यमाणे पराजितायां दिश्यग्निं प्रतिष्ठाप्या
सिमुदकमंडलुमन्नमानमित्यक्तत्तरतोग्नेः कृत्वा वत्सतरीं प्रत्युद्गासंश्रयणे ब
ध्वा पश्चादग्नेराचार्यस्तृणेषूपविश्योदपराजितां दिशमभिसमीक्षमाणो ब्रह्म

२१

चारीलेपान्यदिमज्य प्रदक्षिणमग्निमाचार्यं च कृत्वोपसंगृह्य पश्चादाचार्यस्योप
विश्य तृणेष्वेव प्रत्यग्दक्षिणाभिसमीक्षमाणः पृष्टेन पृष्टं संधाय ब्रूयान्मनसा म
हान्नाम्नीर्भो३ अनुब्रूहीति पुनः पृष्टो नु कोऽग्निनेसंमील्येवानुब्रूयात् पुरा पपदात्त्रि
रन्त्यो न्मुच्योल्लीयमादित्यमीक्षयेन्मित्रस्य त्वा चक्षुषा प्रतीक्षे मित्रस्य त्वा चक्षुषा स
मीक्षे मित्रस्य वश्चक्षुषानुवीक्षध्वमिति दिशः स संभाराः पुनरादित्यं मित्रस्य त्वा चक्षु
षा प्रतिपश्यामि योस्मान्द्वेष्टि यं च वयं द्विष्मस्तं चक्षुषो र्हेतुर्गच्छत्विति दिशमुप
स्थायोदगग्न इळानमइळानमऋषिभ्यो मंत्रकृद्भ्यो मंत्रपतिभ्यो नमो वो अस्तु देवेभ्यः
शिवा नः शंतमा भव सुमृळीका सरस्वति मा ते व्योम संदृशि॥ भद्रं कर्णेभिः शृणुया
म देवाः शं न इंद्राग्नी भवतामवोभिः स्वःपेजनं सुव्रतं नव्यसीभिः कयानश्चित्र आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भुवदितितिस्त्रः स्योनापृथिविभवेतिसमाप्यसमानं संभारवर्जमिषद्भ्योः स्वाध्यायध
र्मआचार्यवदेकेः फाल्गुनाद्याः श्रवणाद्या अनधीतपूर्वाणामध्यायस्तेष्वाद्यधीतपूर्व
णामधीतपूर्वाणां॥१४॥ ॥इत्याश्वलायनश्रौतसूत्रे उत्तरषट्के द्वितीयोध्यायः॥ ॥

॥ ॥ॐ॥ ॥उक्तप्रकृतयोहीनैकाहाः स्विष्टेरहोभिरष्टामतिदेशो नातिदेशोत्वैकाहो
ज्योतिष्टोमोद्वादशाहात दक्षिणस्तेनत्रास्यमेकाहानांगोआयुषीविपरीते व्यूहानां
महानांपृष्ठ्यम्यहः पूर्वोभिप्लवश्च अहोवैवंप्रायाश्च दक्षिणा अर्वागतिरात्रेभ्यः सा
हस्रास्त्वतिरात्रांव्यहास्त्र्यहाश्च येभ्यांसत्र्यहादहीनाः सहस्रंतेषांत्र्यहे प्रसं
ख्यामान्वहंततः सहस्राणि समावत्येवदक्षिणानयेयुरतिरिक्तास्तूत्तमेधिका
अतिदिष्टानांस्तोमपृष्ठसंस्थान्यत्वोदनन्यभावोनित्यानैमित्तिकाविकाराणाध्यं

दिनेतुहोतुर्निष्केवल्येस्तोमकारितंश्चास्यंतत्रोपजनस्तार्क्ष्यवर्जमग्रेस्सूक्तानांहानौततरवोद्वा
रैयेर्वाक्रियेरतस्तोमास्युस्त्वचापवतत्रस्तूक्तस्थानेषुयथानित्यानिविदोभ्युदियात्॥१॥उक्ता
निचातुर्मास्यानिसोमान्वय्यामः पर्वणांस्थानेयूपकानेकैपरिधोपशंनियुंजंतिवैश्वदेव्यास्था
नेप्रथमंपृष्ठ्याहर्जनिष्ठाउग्रउग्रोजश इतिमध्यंदिनएकाहिकाहोत्राः सर्वत्रप्रथमंसांपा
तिकेषूनसूक्तेकाहीभवत्सकवैश्वानरपार्जन्येहविषी अग्नीषोमीयस्यपश्वोः पशुपुरोळाश्यो
न्यायातयेयुः प्रातःसवनिकेषुपुरोळाशेषुवैश्वदेव्याहवींष्यन्वायातयेयुर्वैश्वदेवः पशुर्बार्ह
स्पत्यान्वंध्यावरुणप्रघासस्थानेप्युहउत्तरस्यांह्नः प्रातःसवनिकेषुपुरोळाशेषुवरुणप्रघा
सहवींष्यन्वायातयेयुर्मारुतवारुणोपशुर्मैत्रावरुण्यन्वंध्याग्निष्टोमरैन्द्राग्नस्थानेसाकमेध
स्थानेप्यहोतिरात्रोतोद्वितीयस्याह्नोनुसवनंपुरोळाशेषुपूर्वेद्युर्हवींषित्रीयेहन्नुपांशुंतर्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ० ३२

२२

मोक्तः सौपौर्णदर्वं प्रातः सवनिकेषु श्रेष्ठिनं माध्यंदिनेषु माहेंद्राणं यंतरेण घृतस्याज्यं दक्षिणे मार्जालि
येपित्र्यां तत्रोपस्थानं यथा नातिप्रणीयं चरतामनूलं ध्यायाः पशुपुरोळाशा आदित्यमन्वायातयेपुरा
ग्नेय्यं द्वाग्नेकादशिनाः पशवः सौर्यान्नूलं ध्याग्निष्टोमः शुनासीरीयायाः स्थाने प्रातः सवनिकेषु पु
रोळाशेषु शुनासीरीयायाहवींष्यन्वायातये सुर्वयव्यः पशुराभिरन्यनूलं ध्यान्वहं पंचाशद्व्यो दक्षि
णाः ॥२॥ अथ रज्जस्सर्याः पुरस्तात्सांवत्सर्याः पौर्णमास्याः पवित्रेणाग्निष्टोमेनेष्टीयाशेहणीयेन य
जेत पौर्णमास्यां चातुर्मास्यानि प्रयुंक्ते नित्यानि पर्वाणि चक्राभ्यां तु पर्वांतरेषु च रंस्त्यहर्विपर्ययं प
शुविपर्ययं वा संवत्सरांते समानपक्षेऽभिषेचनीय द्वादशापेयाउक्थ्यावृहत्स्तस्तउभयसामाभिषेच
नीयः संस्थिते मरुत्वतीये दक्षिणत आहवनीयस्य हिरण्यकशिपावासीनोभिषिक्तामं पुत्रामात्य
परिवृतामराज्ञेशौनः शेपमाचष्टे [illegible] हिरण्यकशिपावासीन आचष्टे हिरण्यकशिपावासीनः प्रति

२२

गृणाति यशो वै हिरण्यं यशसैवैनं तत्समर्धयत्योमित्यृचः प्रतिगर एवं तथेति गाथाया ओ
मिति वै दैवं तथेति मानुषं दैवेन चैवैनं तन्मानुषेण च पापादेनसः प्रमुंचति तस्माद्यो राजा वि
जिती स्यादप्ययजमान आख्यापयेतैवैतच्छौनः शेपमाख्यानं न हास्मिन्नल्पं चनैनः परिशि
ष्यते सहस्रमाख्यात्रे दद्याच्छतं प्रतिगरित्रे यथास्वमासनेषु संसृप्य दिग्भिश्चरित्वा दशापेयेन य
जेत तत्र दश दश एकैकं चमसं भक्षयेयुर्नित्यान् संख्यायेतराननुप्रसर्पयेयुर्ब्रह्मा ततः पितृत
श्च दश पुरुषं समनुष्ठिताविद्यातपोभ्यां पुण्येभ्यश्च कर्मभिर्येषामुभयतो नाब्राह्मण्यं निनयेयुः पि
तृतश्चेत्येके नववत्सः कृतसोमास इंद्रः सरवाहयत्र सखिभिर्नवद्धेविरिति निविद्धानयो राधेयस्सूक्तमु
खीये दस्युक एते प्रतीयात उत्तर आपूर्यमाणपक्षे केशवपनीयो बृहत्स्तोमोतिरात्रो व्युष्टिर्मासयोर्वृ
ष्टिद्व्यहोऽग्निष्टोमः पूर्वमहः सर्वस्तोमोतिरात्र उत्तरमुत्तरस्या आपूर्यमाणपक्षे क्षत्रस्य धृतिरग्निष्टोमः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ॰उ॰२

२४

॥३॥ इति राजसूयं न्याय्यं कृताश्वदक्षिणां अन्यत्राभिषेचनीयदशपेयाभ्यामभिषे
चनीये तु द्वात्रिंशतं द्वात्रिंशतं सहस्राणि पृथगृत्विग्भ्यः षोळश षोळशाहूतीयिभ्योऽष्टा
वष्टौ तृतीयिभ्यश्चत्वारि चत्वारि पादिभ्यः संसृपेष्टीनां हिरण्यमाग्नेय्यां वत्सतरी सा
रस्वत्यां मवध्वस्तः सावित्र्यां श्यामः पौष्ण्यां शितिपृष्ठो बार्हस्पत्यायामृषभ ऐन्द्र्यां महा
निरष्टो वारुण्यां साहस्रो दशपेये रुक्माश्वादिष्टदक्षिणाः सौवर्णस्रग्गुञ्जातुरश्वः अस्ता
तुर्धनुः प्रतिहर्तुः रजः स्कब्रह्मण्यायै हिरण्यप्राकाशावध्वर्योः राजतो प्रतिप्रस्थातुर्द्वादश
पष्ठौह्यो गर्भिण्यो ब्रह्मणो वशा मैत्रावरुणस्य ऋषभो होतुः ऋषभो ब्राह्मणाच्छंसिनः कार्पासं
वासः पोतुः क्षौमी वरासी नेष्टुः रक्तयुक्तं यवाचितमच्छावाकस्यानड्वानाग्नीध्रस्य वत्सतर्युन्नेतु
स्त्रिवर्षः सांडो ग्रावस्तुतः ॥४॥ उशनसः स्तोमेन गरगीर्णमिवात्मानं मन्यमानो यजेतोशना

२५

पत्सहस्येरया तं त्वमपो यद्वेतुर्वशाय्येति सूक्तमुखीये गिरस्तोमः भूमिस्तोमः वनस्पतिसवा नीनता
अर्वाणिरेणुककाटो अभुतेन तानि शंतिन दधाति तस्करो वलिष्ठा पर्वतानां ककाचिद्या वनस्पती
देवेभ्यो वनस्पते हवींषि वनस्पते रशना यामि पृथ्वीति सूक्तमुखीया आधिपत्यकामो ब्रह्मवर्चसका
मो वा बृहस्पतिसवेन यजेत तस्य ऋचाः सूक्तस्थाने ऽग्निर्देवेषु राजती त्यामेयस्तं भुनेतय
तिसूक्तमुखीये इंद्रमरुत्व इह न्नणा मुत्स्वेति माध्यंदिने उदु ष्य देवः सविता हिरण्ययां घृतवती भुवना
नामभिश्रियेंद्र ऋभुभिर्वाजवद्भिः समुक्षितं स्वस्ति नो मिमीतामश्विना भग इति वैश्वदेवं वैश्वान
रं मनसाग्निं निचाय्य प्रयंतु वाजास्तविषीभिरग्नयः समिद्धमग्निं समिधा गिरा गृणा इत्याग्नि
मारुतं होत्रकाणामूर्ध्वं स्तोत्रियानुरूपेभ्यः प्रथमोत्तमां स्तत्वाच्छेसेयुः प्रगाथेभ्यस्तमाध्यंदिने ऽनुस
वनमेकादशैकादश दक्षिणा एकादशैकादश वा सहस्राणि शतानि वाश्वो माध्यंदिनेऽधिको भुवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ·उ·२

२५

थ्यात्वमवानॅंधि भुम्रु दुर्यजेतं स घश्चिक्रियानु क्रियापरिक्रियावास्वर्गकामएकत्रिकेण
र्य्येकेन वान्नाद्यकामो गोतमस्तोमेन यश्छंदानकामामेप्रजा स्यादिस्येतेषां सप्तानां शस्य
मुक्तं बृहस्पतिस्सवेनं त्वं भुवः प्रतिमानं पृथिव्या भुवस्त्वमिंद्र ब्रह्मणा महान्स्तद्योहजा
तो वृषभः कनीनस्त्वं सद्यो अपिबो जात इंद्रा नुत्वाहि घ्ने अधदेव देवा अनु ते दायि मह इंद्रि
याय कथो नु ते परिचराणि विद्वानिति द्वे एकस्य चिन्मे विभ्वस्त्वोजएकं नु त्वा सत्पतिं पां
चजन्यं ऽर्यमामनुषो देवता ताम्र धान्वस्यमह्नो महानी त्यादि स्तोमइन्मदर्द्रमदाय
वावृधइति स्तरू मुरवीर्यां ॥५॥ गोतमस्तोममेतरू कथ्यं कुर्वतित्यग्रहांतरुकथ्यश्वे देनम
रुद्भिः द्वभिः पाइंद्रावरुणाभ्यां मत्स्वेंद्राबृहस्पतिभ्यामिंद्राविष्णुभ्यां सजूरित्याग्निमा
रुतेषु रस्तात्सरिधानी यायाआवपेतोभयोराद्यानमन्यतरस्यामेकउक्थ्यस्तोत्रियेषु वेध

२५

शायज्ञीयेन स्वेर्वा सकृदाद्यमस्तोत्रियांस्तथानुरूपानन्यत्राप्येवं स्तोत्रियानुरूप संनिपातेयध
वेन वैयज्ञायज्ञीयमयोनौ सर्वैरवोक्थ्यसामभिः प्रकृत्यास्या तथा सति ॥६॥ अथ नाजिराभ्यामभि
चरन्यजेताहं मनुर्गर्भे नु सं स्तत्वयामन्यो यस्तेमन्यविति मध्यंदिनौत्र्यो बृहस्पतिस्सवेन सन्नद्रु
लोहितोष्णीषा निःस्त्रिंशिनो याजयेयुः शरमयं बर्हिर्मौसला परिधयो बैभीतकइध्मो वा घातको
र्वाप्यमृत्योरावयेत्सत्रागावये त्वाछिंदन्निव वषट्कुर्युर्दुष्यन्निव जुहुयात्स्तावस्के पूर्वरा वेदिः खल
उत्तरवेदिः खले वाली यूपः स्फ्य ग्रो यूपोच षालः कलापी चषाल इत्यागं तु काविकारा अन्यांश्वाध्व
र्यवो विदुः सिद्धे तु शस्ये होतास्वंभ्रे धान्वस्य स्यात्साप्याकी त्यादि हितौ महारोगेण वाथो वालं प्रजननं
प्रजानन्विंदेत सोग्नि द्युवायजेतेति प्रा हरी यो जात एवेति मध्यंदिनः सर्वाग्नेयश्चेत्स्तोत्रियानुरूपा अ
ग्नेया स्युर्विचारि वापि वा सर्वेषु देवता न्याहृ योग्निमेवाभिसंनमेत्तथा सत्यन्वसमिंद्र स्तुता यजेतेंद्र सो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रो॰उ॰३

२६

मभिंद्रं स्तवेतिमध्यंदिनो भूतिकामो वा ग्रामकामो वा प्रजाकामो वोपहव्येन यजेतैमाउ त्वाय एकइ दि
तिमध्यंदिन इंद्राग्न्योः कुलायेन प्रजातिकामं क्तिछाहरीतमुष्टु हीतिमध्यंदिनं ऋषभेण विजि
गीषमाणो मरुत्वाँ इंद्र युधा स्यत इति मध्यंदिनं स्तीव्र सोमेनान्नाद्यकामः कस्य वीर स्तीव्र
स्याभिवयस इति मध्यंदिनो विघनेनाभिचरं स्तस्य त्रास्यमजिरेणं द्राविष्णू रुरुक्रांतिना स्वर्ग
कामं इमाउत्वाद्योर्नय इंद्रेति मध्यंदिनो यः कामयेत नेत्थि त्वं पाप्मन इयामिति सअंतपेयेन
यजेतं ऋतस्य हि शुरुधः संति पूर्वीरिति सूक्तं मुखीये सत्येन वमस्तान्स क्षयंतिसत्यमियं
पृथिवी सत्यमयमग्निः सत्यम यं वायुः सत्यमसावादित्य इति सोमचमसो दक्षिणा ॥७॥
अतिमूर्त्तिनायक्ष्यमाणो मासं सोयर्न्वां इमसी आभि रीभ्यां यजेत शुक्रं वां इमस्या सोर्य
पितरमत्राह गोरमन्वतनवोनवो भवति जायमानं स्तरणिर्विश्वदर्शतो विश्वं देवानामुद

२६

गा दनीकमिति याज्यानुवाक्याः सई महाँ धुनिमेतोर रम्णात्त्व त्रे नाभ्युष्यात्व मुरिं धुनिं चेति
स्तं मुखीये स्वर्यक्रतायन्त्रास्काम्नः पिबा सोममभी इंद्र स्तवेतिमध्यंदिनो व्योमान्नान्नाद्य कामो वि
श्वदेवस्तकतायन्त्रास्कामः पंचशारदीयेन पशुकामं रते षां त्रयाणां कयाभ्यातदिदासेतिमध्यं
दिनं उभयसामानो पूर्वा उक्थ्यः पंचशारदीयो विश्वो विश्वो वो अतिथिमित्याज्यं कण्व रथंतरं पृष्ठं गो
सवविवधौ पशुकामं इंद्र सोममेताया मेति मध्यंदिनो दश सहस्राणि दक्षिणाः षोळशी काहा आयु
र्गौरिति व्यत्यासं मुद्भिद्बलभिदौ स्वर्गकामं इंद्र सोममिंद्रः पूर्भिदिति मध्यंदिनो विनुत्यभिजित्योरि
पुदस्त्र यो श्व मन्युसूक्ते अभिचरन्यजेत त्विष्यपचित्योः सम्राट् स्वराजो राउ विराजोः शारदस्य चैकाहि
कैउपशारदस्य राज्यमराय यो श्वकया शुभायतदिदासी ये ष्टोति कामराज्ये कामान्नाद्यकामेंद्रिय
कामतेजस्कामानामेतेकामाहृयो इयोर्के विस्तोमा श्रात्यस्तोमा श्व एष्याहानि नाकसदकृतुस्तोमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ·उ·२

२७

दिकृतो माश्वाभिप्लवाहानि ॥८॥ वाजपेयेनाधिपत्यकामः सप्तदशदीक्षाः सप्तदशापवर्गो वा
हिरण्यस्रज ऋत्विजो वाजपेयेषु वैश्वकिंजल्कान्नातयधू राहोतु विश्वजिदाज्यं कयाशुभा तदिदा
सेति मध्यंदिनः संस्थिते मरुत्वतीये बार्हस्पत्येष्टि राज्यभागप्रभृतीळांतां बृहस्पतिः प्रथमं जा
यमानो बृहस्पतिः समजयद्वसूनि त्वामीळते अजिरं दूत्यायाग्निं स्तृणीतिं स्तुद्रां गणंतशति
संयाज्ये यदित्वध्वर्युर्वे आजिं जापयेयुस्तस्थ जत्मातीर्थदेशोमयूखे चकं [illegible] प्रतिमुक्तं तदा कृत्य
प्रदक्षिणमावर्त्यमाने वाजिनां साम गायादाविर्मर्या आ वाजं वाजिनो अग्मन् देवस्य सवि
तुः सुवे ॥ स्वर्गा३ँ अर्वतो जयतः स्वर्गा३ँ अर्वतो जयतीति वा यदि साम नाधीयात्त्रिरेतां मन्त्रं जपे
त्तृतीयेनाभिप्लविकेनोक्थ्यं तृतीयसवनं चित्रवती शुचे त्स्तुवीरं त्वं नश्चित्र ऊत्याग्ने विवस्वदुष
स इत्यग्निष्टोमसाम्नः स्तोत्रियानुरूपौ षोळशी त्वि हृतस्मादूर्ध्वमतिरिक्तोक्थ्यं तोप्रतते अघ्निपि

२७

विश्वनाम प्रतद्विष्णुः स्तवते वीर्येणेति स्तोत्रियानुरूपौ ब्रह्म जज्ञानं प्रथमं पुरस्तादिति द्वे दित्सन्प्र राध्यं
तामिळ वसस्पते तं प्रत्नथेति त्रयोदशानामेकां श्रिष्टुं धूप द्रूशेहणं रोहे बृहस्पते युवमिंद्रश्च वस्व
इति परिधानीयाविश्वाद्बृहस्पिबतु सोम्यं मध्विति याज्यातस्य शतं शतानामश्वरथानामश्वानां
साद्यानां वस्त्रानां महानसानां दासीनां निष्ककंठीनां हस्तिनां हिरण्यकक्ष्याणां सप्तदश सप्तदशा
नि दक्षिणां दद्यादन्ये दक्षिणागणा धनानां शतावमा परार्ध्यानां पूर्वान्वा गणान्ब्रह्मण्येभ्यस्थं सप्तदश
सप्तदशा संपादयेदिति वाजपेयं एतेनेष्ट्वा राजा राजसूयेन यजेत ब्राह्मणो बृहस्पतिसवेन ॥९॥
अनिरुक्तस्य चतुर्विंशेन प्रातःसवनं चतृतीयसवनं चाग्न इत्येति तु त्रयोदशा वैश्वदेवं कया
शुभा तदिदासेति मध्यंदिनो होत्रकाउर्ध्वं स्तोत्रियानुरूपेभ्यः प्रथमान्पातान्धं सेयुरहानरू
क्तानि वेदं पूर्वसवने शहत्य ह्येष्व समाम्नातेषु प्रतिकामं विश्वजिच्छिल्पस्तस्य समानं विश्वजिता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ·उ·३

२८

प्रगाथेभ्यो बृहस्पतिसवेनाज्यं निष्केवल्यमरुत्वतीयो च तत्रैव ताभ्यां तु पूर्वे एकाहिके होत्रका
उर्ध्वं प्रगाथेभ्यः शिल्पान्यविहृतानि शंसेयुः साम सूक्तानि चार्धर्चशस्त्या न हीन सूक्तानामन्त्या
नामेकाहिकानामुत्तमान् समानं तृतीयसवनं बृहस्पतिसवेन नाभानेदिष्ठस्त्विह पूर्वो वैश्वदेवा
त्चादिवयामरुद्राग्निमारुतेमारुता न यो रुक्शः शस्योपायः ॥१०॥ यस्य पत्नी वो नो प धरे र
न्त न्याव्याभिजनान्निनीत्वेतस्तोमोर्यामेणायजेत माध्यंदिने शिल्पयोनि वर्जमुक्तो विश्वजि
दैकाहेन गर्भकारं चेत्स्तुवीरं स्तथैव स्तोत्रियानुरूपान् रथंतरेणाग्रेततो वैराजेन ततो रथंतरे
ण बृहद्राजाभ्यां वै वमेवं वामदेव्य ब्राह्मरेमैत्रावरुणस्य नोधसेवे रूपे ब्राह्मणाच्छंसिनः ॥२९॥
नेयेत वैरूपे वा कालेय रेवते अच्छावाकस्य सामानंतर्येण द्वौ द्वौ प्रगाथाव गर्भकारमतिरात्र
स्त्विहाच्छपदेत्वस्य श्वेद्वे पुवतं तृतीयसवनं सर्वमाश्विनादतिरिक्तोक्थानि न राबोधतद्विविद्वि

जरमाणः समिध्यसे ऽग्निर्नेंद्रेणाभा त्वग्निः सेत्रस्य पतिना वयमिति परिधानीया सुवंदे
वा ऋतुनापूर्येणोति याज्याय दघक्रद्वृत्रहन्तु हृद्रभिश्रुतामघमानो विश्वाभिः प्रातर्या
वाणा क्षेत्रस्य पते मधुमंतमूर्मिमिति परिधानीया सुवां देवास्त्र यएकादशास इति याज्या तमिं
द्रं वाजयामसि महां इंद्रो य ओजसा नूनमश्विना तं वां रथं मधुमतीरोषधीर्द्याव आप इति परि
धानीया पनाय्यं तदश्विना कृतं वामिति याज्या तो देवा अवंतु न इति स्तोत्रियानुरूपा उत नो धि
यो गो अग्रा इति वा ऽनुरूपस्यात्तमेके द्यावा पृथिवी उ भा उ नूनं दैव्या होतारा प्रथमा पुरोहित इ
ति परिधानीया ऽयं वां भागो निहितो यजत्रेति याज्या यदिन्द्राधीयातुरा गमो कः सरव्यं त्रिविं
वामिति च तस्यो याज्या स्तद्वेगायस्क्तेस चासो त्रामिंद्राय गायत तलमुवः सत्रासाहं सत्राते
अनुरूपस्य प्रतिवा स्तोत्रियानुरूपा ऽ अपरिमिताः परः सहस्रा दक्षिणाः श्वेतश्वाश्वतरीर

॥२९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ.उ.४

२९

थो होतुर्होतुः ॥११॥ ॥ इत्याश्वलायनश्रौतसूत्रे उत्तरषट्के तृतीयोध्यायः ॥ ॥ ॐ ॥ ॥
ज्योतिरर्द्धिकामस्य नवसप्तदशः प्रजातिकामस्य विषुवत्स्तोमो भ्रातृव्यवतो गोरभिजिद्वा गो
रूभयसामा सर्वस्तोमो बुभूषतश्चामुद्रेषुर्व्याधेः पशुकामस्य विश्वजिद्ब्रह्मवर्चसकामवी
र्यकामप्रजाकामप्रतिष्ठाकामानां त्र्यहाहान्यादितः पृथक्कामेरित्यतिरात्रस्तेषामाद्यास्त्र
य एकाहिकत्रास्याहस्त्येकाहाश्चथाहीनाद्यहप्रभृतयो द्वादशरात्रपराश्चाग्निष्टोमाद्याति
रात्रांता मासापवर्गी अपरिमाणदीक्षारेकाहांश्चेतरे यिणः साहस्रत्राश्वदक्षिणा अति
रात्रांश्च सर्वत्रास्तत्राह्नां संख्याः संख्यातोः पश्वेहांताश्च भिन्नवादतिरात्रस्तेत्यः संख्यापू
रणे गृहातानां हानो वैश्वानरोधिकः ॥१॥ आंगिरसं स्वर्गकामो यो वा पुण्योहीनो नुप्रेप्सुः
स्याच्चैत्ररथमन्नाद्यकामः कापिवनं स्वर्गकाम इति द्व्यहाः प्रथमस्य तूत्तरस्याद्वितात्रयं

२९

प

तृतीयसवनं त्वं हि क्षैतवदिति चाज्यं गर्गत्रिरात्रं स्वर्गकामस्तस्य मध्यमस्याह्नो वामदेव्यं पृष्ठं
विद्रोविशीयमग्निष्टोमसाम वारवंतीयमुत्तमे त्वमग्ने वसूंरिति चाज्यं वैदत्रिरात्रं राज्यकामः सर्वे त्रि
वृतो तिरात्राश्छंदोमपवमानांतर्वसू पशुकामः पराकच्छंदोमपराको स्वर्गकाम इति त्र्यहा गर्गत्रिरा
त्रस्यान्त्रेश्च तु व्रंशं वीरकामस्तस्य वीरवंत्याज्यानि यमग्ने वाजसातमेति द्वितीये हन्या
ज्यमग्नायो मर्त्य इति तृतीये ऽग्निं नर इति चतुर्थे षोडशिमच्चतुर्थं तस्याभित्वा वृषभा सुत इति
गायत्रीषु रथंतरं पृष्ठमनुष्टुप्सु बृहती ष्वृष्टह च्चतुर्थं त्वं बलस्य गोमतोपऽज्ञा यथा त्र पूर्व्याति वा
जामदग्नं पुष्टिकामस्तस्य पुरोळाशिन्य उपसदो वैश्वामित्रं मिनात्व्यवान्प्रजाकामो वसिष्ठ
संसर्पमिति चतुरहाः सार्वसेनं पशुकामो दैवं भ्रातृव्यवान् पंचशारदीयं पशुकामो व्रतवंतमायु
ष्कामो वावरं वाक्प्रवदिषुरिति पंच पंचरात्राः पंचशारदीयस्य तु सप्तदशोक्ष्णा ऐंद्रामारुता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ·उ·४

३०

मारुतीभिः सह वत्सतरीभिः सप्तदशाभिः सप्तदशाभिः पंचवर्षं पर्यग्निकृताः सवनीयास्ते
षां त्रीं स्त्रीं श्चतुर्थे हः स्वालभेरन्परिशिष्टान्यंच पंचमे श्रन्वतस्तत्तृतीयस्याह्नः स्थानेमहाव्र
तं पृष्ठ्य पंचाहउत्तमः ॥२॥ अतूर्त्तोषड्हं प्रतिष्ठाकामः पृष्ठ्यः समूढ्को व्यूढ्को वा पृष्ठ्यावलं
बं पशुकामः पृष्ठ्य पंचाहोऽभ्यासक्तो विश्वजिच्च संभार्यमायुष्कामः पृष्ठ्यत्र्यहः पूर्वैर्भिप्ल
वत्र्यहश्चर्षिसप्तरात्रमृद्धिकामः प्राजापत्यं प्रजाकामश्छंदोमपवमानव्रतं पशुकामो
जामदग्नमन्नाद्यकामएते चत्वारः पृष्ठ्योमहाव्रतं च व्रतं तु स्व स्तोमं प्रथमे सप्तदशं द्वि
तीये छंदोमपवमानं तृतीये चतुर्विंशो बहिष्पवमानः सप्तदशाऽन्ये पश्चतुर्थे रिंद्रस्तुन्योः
प्रजाबुभूर्षोस्त्रिककुत्काश्चभिजिद्विश्वजिन्महाव्रतं सर्वस्तोमोजनकसप्तरात्रमृद्धिकामो
भिप्लवचतुरहो विश्वजिन्महाव्रतं ज्योतिष्टोमः पृष्ठ्यस्तोमोविश्वजिच्च पशुकामस्य सप्तमोदेव

३०

लमीकृतोऽहरात्रः पृष्ठ्योमहाव्रतं ज्योतिष्टोमो नवरात्रमायुष्कामः पृष्ठ्यस्त्रिककुत्कात्रि
ककुत्काः पृष्ठ्यावलंबवृ इति पशुकामस्यैति नवरात्रौ त्रिककुब्मध्यर्द्धः पृष्ठ्यो महात्रिककुब्व्यूढ्को
नवरात्रः समूढ्कस्त्रिककुप्समूढ्कश्चतुष्टोमस्त्रिककुब्मध्यार्द्धोऽभिप्लव एतैश्चतुर्भिः स्वानोऽश्रे
ष्ठ्यकामो यजेत कुरुकुरुविंदुमृद्धिकामस्त्र्यार्षेयाणां पृष्ठ्याक्रमिकेऽर्क त्रिछंदोमवं तं पशुकामः
पृष्ठ्यावलंबस्य प्राग्विश्वजितश्छंदोमाद्दशमं चाहः पुराभिचरन्ज्योतिर्गौरभिजितो गोरभि
जितं विश्वजिदासुषं त्रालली पित्रं गश्री कामोऽभिप्लवत्र्यहः सर्वस्त्रिरिति दशरात्राः ॥३॥
पौंडरीकमृद्धिकामः पृष्ठ्यस्तोमश्छंदोमा गोतमस्तोमो विश्वजिद्व्यूढ्को नवरात्रो महाव्रतं
वैश्वानरऽतिवोः थसंभार्याव तिरात्रश्चतुर्विंशमध्य द्वौऽभिप्लवः पृष्ठ्यो वैद्र्र दशत्रेभ्यात व्य
वान्पृष्ठ्यस्याद्येऽहनी व्यस्यासमानवरात्रान्महाव्रतं ॥४॥ अथद्वादशाहान्वेयुः सत्राणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ॰उ॰४

३१

भवेयुरहीनावो ज्योतिरत्रः समूल्होल्यो ज्योतिरतमभितोतिरात्रौ संस्थाप्यमोवैश्वानरमुपदध्या
त्संवत्सरप्रवल्ह्श्रीकामोतिरात्रश्चतुर्विंशो विषुवद्ज्योनवरात्रमहाव्रतमथभरतद्वादशाहमेवैकाह
पृथक्संस्थाभिरुपेयुरतिरात्रमग्निष्टोममथाष्टाउक्थ्यानिथाग्निष्टोममथातिरात्रमिति द्वादशा
हस्तेरात्मनावुभक्षंतः प्रजयापशुभिः प्रजनयिष्यमाणाः स्वर्गलोकमेष्यंतः स्वानां श्रैष्ठ्यमेकं तउ
पेयुर्वायजेतवेति पृथक्कमथसामान्यमपरिमितत्वाद्दुर्मस्यप्रदेशान्वक्ष्यामोयथाहि परिमिता वर्णा
अपरिमितांवाचोगतिमाप्नुवंत्येवमेव परिमितानामङ्गानामपरिमिताः संघाताः सिद्धानित्वहानिति
पांयः कश्च समाहारः सिद्धमेवत्रास्यमङ्गानुसंत्रायेस्तोमपृष्ठसंस्थाभिरेकैव्यवस्थांतेकृत्वं ८ ३१
दृष्टत्वाद्यतिक्रमस्यछंदोगैरेवकृत्वासमयमङ्गोबार्हतराथंतरसैर्यामिकाहेनत्रास्यंराथंतराणां ता
द्वितीयेनाभिपूर्विकेन बार्हतानामपिवैकाश्वभीयतदिदासीयैर्वेनिधिद्धानीयेस्यासामिकाहि

कमितरत्॥५॥ सर्वान्कामानाप्स्यन्त्सर्वाविजितीर्विजिगीषमाणः सर्वाव्युष्टीर्व्युषिष्यन्नश्वमे
धेनयजेनोश्वमुत्सक्ष्यन्निष्टीभ्यांयजेनाग्निर्मूर्द्धन्वाग्निराजोसंयाज्येपोस्योद्वितीयात्वमग्ने
सप्रथाअसिसोमयास्तेमयोभुवइतिसद्दंतौत्वांचित्रश्रवस्तमंयद्वाहिष्ठंतदग्नयइतिसंयाज्ये
अश्वमुत्सृज्यराक्षिणोविधायसावित्र्यस्तिस्त्रइष्टयोहरहर्वैराजनंत्राः सविता सत्यप्रसवः प्र
सवितासवितायइमाविश्वाजातान्यादेवोयातुसवितास्फुरत्नैः सद्यानोदेवः सवितासहावेतिद्वे
समासासुसमामासुदक्षिणतआहवनीयस्यहिरण्यकशिपावासीनोभिषिक्तायपुत्रामात्य
परिवृतायराज्ञैपारिप्लवमाचक्षीतहिरण्मयेकूर्चेऽध्वर्युरासीनः प्रतिगृणात्याख्यास्य
न्नोध्वर्यवित्याह्वयीतहोतहोतरित्तरः॥६॥ प्रथमेहनिमनुर्वैवस्वतस्तस्यमनुष्याविशस्त
इमआसतइतिगृहमेधिनउपसमानीताः स्युस्तानुपदिशत्यृचोवेदः सोयमितिसूक्तं निग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्री उ.४

३२

द्वितीयेहनि यमो वैवस्वतस्तस्य पितरो विशस्त इम आसत इति स्थविरा उपसमानीतास्स्यु
स्तानुपदिशति यजुर्वेदो वेदः सोयमिति यजुषामनुवाकं निगदेत्तृतीयेहनि वरुण आदित्यस्तस्य गं
धर्वा विशस्त इम आसत इति युवानः शोभना उपसमानीताः स्युस्तानुपदिशत्यथर्वणो वे
दः सोयमिति यद्भेषजं निशांतं स्यात्तं निगदेच्चतुर्थेहनि सोमो वैष्णवस्तस्याप्सरसो विशस्ता
इमा आसत इति युवतयः शोभना उपसमानीतास्स्युस्ता उपदिशत्यांगिरसो वेदः सोयमि
ति यद्घोरं निशांतं स्यात्तं निगदेत्पंचमेहन्यर्बुदः काद्रवेयस्तस्य सर्पा विशस्त इम आसत
इति सर्पाः सर्पविद इत्युपसमानीताः स्युस्तानुपदिशति विषविद्या वेदः सोयमिति विषवि
द्यां निगदेत्षष्ठेहनि कुबेरो वैश्रवणस्तस्य रक्षांसि विशस्तानीमान्यासत इति सेलगाः पापकृ
त इत्युपसमानीताः स्युस्तानुपदिशति पिशाचविद्या वेदः सोयमिति यत्किंचित्पिशाच

३२

संयुक्तं निशांतं स्यात्तं निगदेत्सप्तमेहन्यसितो धान्वस्तस्यासुरा विशस्त इम आसत इति कुसी
दिन उपसमानीतास्स्युस्ताननुपदिशत्यसुरविद्या वेदः सोयमिति मायां कांचित्कुर्यादष्टमेहनि मत्स्यः
सांमदस्तस्योदकेचरा विशस्त इम आसत इति मत्स्याः पुंजिष्ठा इत्युपसमानीताः स्युस्तानुपदिश
ति पुराणविद्या वेदः सोयमिति पुराणमाचक्षीत नवमेहनि तार्क्ष्यो वैपश्यतस्तस्य वयांसि वि

=वि=

मे

शस्तानीमान्यासत इति वयांसि ब्रह्मचारिण इत्युपसमानीताः स्युस्तानुपदिशतीतिहासो वे
दः सोयमितीतिहासमाचक्षीत दशमेहनि धर्म इंद्रस्तस्य देवा विशस्त इम आसत इति युवानः
श्रोत्रिया अप्रतिग्राहका इत्युपसमानीताः स्युस्तानुपदिशति सामवेदो वेदः सोयमिति साम
गायेदेवमेतत्पर्यायाः संवत्सरमाचक्षीत दशाभीदशाभी समापयन्संवत्सरं तद्दीक्षेत ॥७॥
त्रीणि सुत्यानि भवंति गोतमस्तोमः प्रथमे द्वितीयस्याह्नः पशोरुपाकरणकाले अश्वमानीय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ॰उ॰४

३३

बहिर्वेद्यास्तावेवास्थापयेयुः स चेदेवं घ्नाप्याडुपवर्तेत बीभत्समध्वं विर्घ्योन चेत्तक गव्यंनो
वाजी स्वभ्य्यमितियजमानं वाचयेत्तमुपस्थितमुपाकरणाय यदक्रंददित्येकादशाभिः स्तोत्यप्र
णुवन्नेनुस्वाध्यायमित्येकेऽध्रिगो शमीध्वमिति त्रिः शूपपूर्वं शतिरस्यवंक्रय शति वामा नो मित्र
इत्यावपेतो पप्रागाच्छसनं वाज्यवेति चतुर्दं संज्ञप्तमश्वं पत्न्याधून्वंतिदक्षिणानके त्रापक्षानुद
ध्येतरान्प्रचत्य सव्यान्करूनाघ्ना नाप्यथान्मेमहिषीमुपनिपातयेतितांहोताभिमेथति माता च
ते पिता चते ग्रे वृक्षस्य क्रीळतः॥ प्रतिलानीतितेपिता गभे मुष्टिमतंसयदिति सा होतारं प्रत्यभि
मेथत्यनु चर्यश्चत्वारांतराजपुत्र्यो माता च ते पिता च ते ग्रे वृक्षस्य क्रीळतः॥ यीयस्यत इव ते मु

३३

खं हातर्मार्लवदो वद्धितिवावातांअलोध्वीमिनामुञ्छयता द्विरेभारं हरन्निव॥ अथास्ये
मध्यमे जलुत्राते वा ते पुनर्निवेति सा ब्रह्माणं प्रत्यभिमेथत्यनु चर्यश्चत्वारांतराजपुत्र्युर्ध्वमेन

मुञ्छयतगिरौ भारं हरन्निव॥ अथास्य मध्यमेजनुञ्याते वा ते पुनर्निवेतिसदः अस्पप्यस्वा
हा कृतिभिश्चरित्वा॥ ८॥ अश्लोध्यं वदंतिकः स्विदेकाकी चरति क उस्विज्जायते पुनः॥ किंस्वि
द्धिमस्य भेषजं किंस्विदावपनं महदिति होताध्वर्युं पृच्छति सूर्य एकाकी चरति चंद्रमा जायं
ते पुनः॥ अग्निर्हिमस्य भेषजं भूमिरावपनं महदिति प्रत्याह किंस्वित्सूर्यसमं ज्योतिः किं समु
द्रसमं सरः॥ कः स्वित्पृथिव्यै वर्षीयान्कस्य मात्रा न विद्यत इत्यध्वर्युर्होतारं पृच्छति ब्र
ह्म सूर्यसमं ज्योतिर्द्यौः समुद्रसमं सरः॥ इंद्रः पृथिव्यै वर्षीयान्गोस्तु मात्रा न विद्यत इति प्र
त्याह पृच्छामि त्वा चितये देवसख यदि त्वमत्र मनसा जगंथ॥ केषु विष्णुस्त्रिषु पदेष्वस्थः के
षु विश्वं भुवनमाविवेशेति ब्रह्मोद्गातारं पृच्छत्यपि तेषु त्रिषु पदेष्वस्मि येषु विश्वं भुवनमा
विवेश॥ सद्यः पर्येमि पृथिवीमुत द्यामेकेनांगेन दिवो अस्य पृष्ठमिति प्रत्याह केष्वंतः पु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपश्चाविविन्ना कान्यंतः पुरुषश्चार्पितानि ॥ एतद्वत्सम्नुपवल्हामसि त्वा किंस्विन्नः प्रतिवो
चास्यत्रे सुजाता ब्रह्माणं एकोतिपं चरस्वंतः पुरुषश्चाविविन्ना तान्यंतः पुरुष आर्पितानि ॥ ए
तत्वात्र प्रतिवन्वानो अस्मिन्नमायया भवस्युत्तरो मदितिप्रत्याह अग्नं चमुपनिष्क्रम्यैके क
न्नोयजमानं एकोतिं एकामित्वा परमंतं पृथिव्या इतीयं वेदिः परोंतः पृथिव्या इति प्रस
र्पमहिम्नापुरस्तादुपरिष्टाच्चवपानां चरंति सूर्यः स्वयंभूः प्रथमोमतर्महत्यर्णवे ॥
दधे ह गर्भमृत्वियं यतो जातः प्रजापतिः ॥ होता यक्षत्प्रजापतिं महिम्नो जुषतां वेतु पि
बतु सोमं होतर्यजेति प्रैषस्त्वेवमे लोकाः प्रदिक्षो दिशश्चेति याज्याः श्वोजस्तपरो गो
मृग इति प्राजापत्या वैश्वदेवीकूष्मांडी विंतरे पां पशूनां प्रचरंति पंचमेन पृष्ठ्याह्ना रासस्य व्यू
व्ढस्य ॥ ९ ॥ तस्य विशेषान्वक्ष्यामो ग्निं तं मन्य इत्याज्यं तस्यैकाहिकमुपरिष्टात्मउगतत्त्वैवे

काहिकास्तत्त्वा ग्निं कद्रुके पुमहिषो यवाशिरामिति मरुत्वतीयस्य प्रतिपदेकात्तच स्थाने एकाहि
कोनुचरः सूक्तेषु चास्य मुहूर्त्यै काहिकमुपसंहारस्यंतस्मिन्निविदं दध्यादेवं निष्केवल्येऽभित्यं देवं
सवितारमोण्योरिति वैश्वदेवस्य प्रतिपदेकात्तच स्थाने एकाहिकोनुचरः सूक्तेषु चैकाहिकान्यु
पसंहारस्यतेषु निविदो दध्यादेवमेवाग्निमारुते चतुर्थं पृष्ठ्याहस्तमं ज्योतिर्गौरायुरभिजिद्विश्वजि
न्महाव्रतं सर्वस्तोमो प्तोर्यामो वाहर्भिपुरुषवर्जं म ब्राह्मणां वित्तानि प्रतिदिशमृत्विग्भ्यो दक्षिणा ददा नां
ति प्राची दिग्घोतुर्दक्षिणा ब्रह्मणः प्रतीच्यध्वर्योरुदीच्युद्गातुरेता एव होत्रकाणामन्वायत्ता अन्वा
यत्ताः ॥ १० ॥ ॥ इत्याश्वलायनश्रौतसूत्रे उत्तरषट्के चतुर्थोध्यायः ॥ ॥ ॐ ॥ ॥ अथैतेषामह्नां यो
गविशेषान्वक्ष्यामो यथायुक्तानि यस्मै यस्मै कामाय प्रभवंत्ययमेवैकाहोतिरात्रे आदौ प्रायणीयप
योंत्य उदयनीयो व्यक्तो मध्ये हीनेषु वैश्वानरस्य एवं तावंतरेण व्यूळ्हो द्वादशरात्रः पाक्षे प्रोतिः सत्राणां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ॰उ॰५

३५

तत्रावापस्थानं मूर्ध्वं द्विरात्रादिकाहार्थे महाव्रतं प्राग्द्विरात्रादितरेषामङ्गानां गव्यहार्थे गोत्रायुषी
अहार्थे त्रिकद्रुकौ अभिप्लवत्र्यहं पूर्वं त्रिकद्रुका इत्याचक्षते चतुरहार्थे त्रिकद्रुकौ महाव्रतं च पंचाहार्थे
भिप्लवपंचाहं उत्तमस्य तु षष्ठ… तीयसवनं षडहार्थे भिप्लवः षडहः एवं न्यायात्वावापः षडहान्तात् पुनः
पुनः पूर्णः पूर्णश्च षडहः स्तं त्रमामेव गच्छति ॥ द्वित्रयोदशरात्रा वृद्धिकामानां प्रथमं दशाहं छन्दोमांश्चा
तरा सर्वस्तोमोतिरात्रो न्यायक्लृप्तं महाव्रतं प्रतिष्ठाकामा द्वितीयं त्रीणि चतुर्दशरात्राणि सार्वकामिकं प्र
थमं द्वे एष्याबावृत्तउत्तरस्तस्मे वोदके वा विवाहे वा मीमांस्य मानाद्वितीयं दशममभितस्त्रिकद्रुकौ न्यायक्लृ
प्तं दशहोपजनं प्रतिष्ठाकामास्तृतीयं चत्वारिंशं चतुर्दशरात्राणि दिवत्वमीप्सतां प्रथमं प्रथमस्य चतुर्दशरात्र
स्य दशममश्वमेधमहाव्रतं ब्रह्मवर्चसकामा द्वितीयं द्वितीयस्य चतुर्दशरात्रस्याग्निष्टुत्त्रायणी मा द्वन्तरः
सात्राहानिकंजन्मौलोकावाप्स्यतां तृतीयं तृतीयस्य चतुर्दशरात्रस्याग्निष्टुत्त्रायणी मस्थाने न्याय

३५

क्लृप्तमत्र्यहोपजनः शेषो न्यायक्लृप्तं त्र्यहोपजनं प्रतिष्ठाकामाश्चतुर्थं पंचदशरात्रं चतूरात्रोपजन
मन्नाद्यकामाः सप्तदशरात्रं पंचरात्रोपजनं पशुकामा अष्टादशरात्रमायुष्कामाः षडहश्चात्र पूर्वं तते
सतंत्रस्योपजनं वक्ष्यामैर एकान्नविंशतिरात्रमेकरात्रोपजनं ग्राम्यानारण्यान्पशून वरुरुत्स्यमा
नो विंशतिरात्रं प्रतिष्ठाकामा अभिजिद्विश्वजितावभिप्लवादूर्ध्वं ॥ द्वावेकविंशतिरात्रौ प्रतिकामा

ष्ठा

नां प्रथमं त्रयाणामभिप्लवानां प्रथमावंतरातिरात्रौ ब्रह्मवर्चसकामा द्वितीयं नवरात्रस्याभिजिद्वि
श्वजितोः स्थाने द्वे एष्याबावृत्तउत्तरः संवत्सरसंमिता इत्याचक्षते द्वाविंशतिरात्रं चतूरात्रोपजन
मन्नाद्यकामास्त्रयोविंशतिरात्रं पंचरात्रोपजनं पशुकामा द्वे चतुर्विंशतिरात्रौ प्रजातिकामाः पशु
कामा वा प्रथमं षडहश्चात्र पूर्वं ततः सतंत्रस्योपजनं वक्ष्यामः स्वर्गलोके वत्स्यंतो ब्रध्नस्य विष्टपं
रोक्ष्यंतो द्वितीयं दशमस्तोमस्त्रयस्त्रिंशो निरुक्तो विशालः दशमस्तोमा एकविंशात्त्रिणवत्रय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ·उ·५

॥३६॥

त्रिंशूताः प्रतिलोमाः पूर्वस्मिंस्त्र्यहेऽनुलोमा उत्तरस्मिन्त्सविद्याऽऽलोपिचोत्तरस्य त्र्यहः प्रतिलो
मोऽनुलोमश्चाग्निरुक्तं महाव्रतं पृष्ठ्यस्तोमश्चिरदनिरुक्तौ ज्योतिरुभयसामासंसदोमयनमि
त्येतदाचक्षते पंचविंशतिरात्रमेकरात्रोपजनमन्नाद्यकामाः षड्विंशतिरात्रं द्विरात्रोपजनं प्रति
ष्ठाकामाः सप्तविंशतिरात्रं त्रिरात्रोपजनमृद्धिकामा अष्टाविंशतिरात्रं चतूरात्रोपजनं ब्रह्मव
र्चसकामा एकान्नत्रिंशद्रात्रं पंचरात्रोपजनं परमां विजितिं विजिगीषमाणास्त्रिंशद्रात्रमन्नाद्य
कामाः षळहश्चात्र पूर्यतेऽस्यान्त्रस्योपजनं वक्ष्याम एकत्रिंशद्रात्रमेकरात्रोपजनमन्नाद्यकामा
द्वात्रिंशद्रात्रं द्विरात्रोपजनं प्रतिष्ठाकामाः ॥३॥ त्रीणि त्रयस्त्रिंशद्रात्राणि प्रतिष्ठाकामानां प्रथमं
त्रयाणामभिप्लवानामुपरिष्टादुपरिष्टादतिरात्रो ब्रह्मवर्चसकामा द्वितीयं चतुर्णां पंचरात्राणामा
वृत्त उत्तमं उत्तमोऽन्तरा सर्वस्तोमोऽतिरात्र उभालोका वाप्नुवतां तृतीयं पञ्चानां पंचरात्राणां मध्ये विश्वजि

॥३६॥

दतिरात्र आवृतास्तत्र त्र्यश्चतुस्त्रिंशद्रात्रं चतूरात्रोपजनमन्नाद्यकामाः पशुकामानामुत्तराणि
चत्वारि पंचत्रिंशद्रात्रं पंचरात्रोपजनं षट्त्रिंशद्रात्रे षळहस्तु अत्र पूर्यते सतंत्रस्योपजनं वक्ष्यामः सप्तत्रिं
शद्रात्रमेकरात्रोपजनमष्टात्रिंशद्रात्रं द्विरात्रोपजनमेकान्नचत्वारिंशद्रात्रं त्रिरात्रोपजनममनंताश्रिय
मिच्छंतश्चत्वारिंशद्रात्रं चतूरात्रोपजनं परमां विराजि प्रतितिष्ठंत एकचत्वारिंशद्रात्रप्रभृतीन्युत्तरा
णि न्यायेनाष्टाचत्वारिंशद्रात्रात्संचारद्रात्रप्रभृतीनि चाषष्टिरात्राद्द्विषष्टिरात्रप्रभृतीनि चैकोनशत
रात्रात्तत्रैकरात्रचतूरात्रोपजनानि व्रतवंति ॥४॥ सप्तैकान्नपंचाशद्रात्राणि विपाप्मना वत्सरेतः
प्रथममतिरात्रस्त्रीणि त्रिवृंत्सहान्यतिरात्रो द्वादश पंचदशान्यतिरात्रो द्वादश सप्तदशान्यतिरात्रः
एकविंशतिरात्रो द्वादश एकविंशान्यतिरात्रस्त्रिवृता प्रथमोऽग्निष्टोमः षोळशपुत्तमाः पंचदशानामुक्थ्या
इतरे विधृतयस्त्वा चक्षते यमातिरात्रं समाहुर्गुणाभिवधिर्यमिच्छंतो द्विबधि प्लवो गोआयुषी अ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ०सू० ५

३७

तिरात्रोऽहूवभिप्लवौ वा विश्वजिदभिजितावतिरात्रौ वैको भिप्लवः सर्वस्तोम नवसप्तदशावतिरात्रौ महा
व्रतं स्वानां श्रैष्ठ्यकामा सप्ततीमे चतुर्णामेकैः पृष्ठ्याद्भूमिकेकेन नवदश स्तोमेन सवर्गाणां प्रथम पृष्ठ सप्तमोत्त
मान्यहान्यग्निष्टोमा उक्थ्या इतरे महाव्रतं स्वविचुःक कुभ इत्याचक्षते ॥ ५ ॥ अथाणामुत्तरेषोन्यायस्तुन्या
त्रभिप्लवाः प्रथमस्यमतूर्ध्वं चतुर्थी सर्वस्तोमो तिरात्र उपसत्सु गार्हपत्ये गुग्गुलुसुगन्धितेजनपैतुदा
रुभिः पृथक्कृसपं सुविविपच्याज्यं सवनेसन्लेषु नाराशंसेषु जीरत्नाभ्यंजीरंश्चय वर्चसानभाज्यमुर्यवी
त्मानं नेवृजानारस्ता एता उपेयुरांजनाभ्यंजनीया इत्याचक्षते एता एव प्रतिष्ठाकामानां मांजनाभ्यं
जनवर्जमेता सामेव सर्वस्तोमस्थाने महाव्रतमेके मत्यन्त्याः प्रजा बुभूषन्त एतासामेव सर्वस्तोममु द्
सयथास्थानं महाव्रतं संवत्सरकामाना पूर्वं तऽतम मतिरात्रश्चतुर्विंशं त्रयो भिप्लवा नवरात्रा भि
प्लवो गोआयुषी दशरात्रो व्रतमतिरात्रः संवत्सरसंमिता इत्याचक्षत एकषष्टिरात्रं प्रतिष्ठाका

३७

माः ता सामेव पृष्ठ्यावभितो नवरात्रं तयोरावृत उत्तरः शतरात्रमायुष्कामाश्चतुर्दशाभिप्ल
वांश्चतुरहो पजनादृति रात्रिसत्राणि ॥ ६ ॥ अथ गवामयनं सर्वकामाः प्रायणीयचतुर्विंशेउपे
त्यचतुरभिप्लवान्पृष्ठ्यमुपयन्मासान्पर्यं स्यपृथक् संभरं तित्रीनभिप्लवान्पृष्ठ्यमभिजि
तं स्वरसामान इत्याभ्यां पूर्यते होत्याभिति नु पूर्वं पक्षोऽथ विषुवानेकविंशो न पूर्वस्य पक्षस्यो त्त
रस्यावृत्ताः स्वरसामानः षळहाश्वोत्तरस्य पक्षसः स्वरसाम्नो विश्वजितं पृष्ठ्यं त्रीनभिप्लवानिति
सप्तमांद्रि रात्रोनं कृत्वाथ पृष्ठ्यमुपयंश्चतुरभिप्लवांश्चतुरोमासानुपर्यस्य तमं संभरं ति त्रीन
भिप्लवान्गो आयुषी दशरात्रं त्रं महाव्रतोदयनीयाभ्यां सप्तमः पूर्यत इति त्वेक संभार्यमुत्तरं पक्षो यदि
संभार्यं व्रतोदयनीये एवोत्तमस्यं गो आयुषी सप्तमस्य गो आयुषी वा विहरे युर्गो विश्वजितो नं
तरमायुषं पूर्वं दशरात्रादपि वोर्ध्वं विश्वजितः सप्तमं सवनमासं कृत्सो दूरे युर्गो आयुषी दशरा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ०उ०६

३९

र्भं चापि वोत्तरस्य पक्षस्य सोऽहान्येवावर्तेरन्ननुलोमाः षळहाः स्युः षळहा वावर्तेरन्ननुलोमान्यहा
नीति गवामयनं सर्वे वा षळहा अभिप्लवाः स्यु रभिप्लवाः स्युः ॥७॥ ॥ इत्याश्वलायनश्रौतसूत्रे
उत्तरषट्के पंचमोध्यायः ॥ ॥ॐ॥ ॥गवामयनेनादित्यानामयनं व्याख्यातं सर्वे त्वभिप्लवास्त्रिवृ
र्मं व्रदशौ मासाश्च पृष्ठ्यमध्यांनवषष्ठसंमितमासान्वधिचा बृहस्पतिसवेंद्रस्तौ चाभिजिद्विश्व ह
जितोः स्थाने सप्तमस्य च मासस्योत्तमयोरभिप्लवयोः स्थाने त्रिवृद्घृतक्कोदशरात्रं उद्भिद्बलभिदो
चोत्तमस्य च मासस्यादौ ये भिप्लवास्त्रय उद्धृत्य ते ऽथाम पृष्ठ्यमथ स्युः पृष्ठ्यमध्यमाः सम्यक्कोदशरा
त्रः ॥१॥ आदित्यानामयनेनांगिरसामयनं व्याख्यातं त्रिवृतस्त्वभिप्लवाः सर्वे पृष्ठ्यादयश्चाघामा ॥३८॥
साः पंच पूर्वस्य पक्षस्य चत्वार उत्तरस्य पृष्ठ्यांता आरंभाद्यं उत्तमस्य च मासस्यादौ ये षळहा
स्त्रयः पृष्ठ्यांता एव ते पि स्युः पूर्वे स्यातामभिप्लवौ ॥२॥ दृतिवातवतोरयनं प्राक्षणीयोतिरात्र त्रि

वृता मासं पंचदशेन मासं सप्तदशेन मासमेकविंशेन मासं त्रिणवेन मासं त्रयस्त्रिंशेन मा
सं व्रतं विषुवत्स्थाने एते एव मासाः प्रतिलोमे पक्ष उत्तरमुदयनीयोतिरात्र एतेषामेवाक्रामति
रात्रा वित्य परमन्यत्राप्यादिष्टे कालपूरणे न चेत्संस्थानियमः ॥३॥ कुंडपायिनामयने मासं दीक्षि
ता भवंतितिमासि सोमं क्रीणंतितिवांद्वादशोपसदो भवंति सोममुपनह्य प्रवर्ग्यपात्राण्युत्सा
द्योपनह्य वा मासमग्निहोत्रं जुह्वतिमासं दर्शपूर्णमासाभ्यां यजंते मासं वैश्वदेवेन मासं वरुण
प्रघासैर्मासं साकमेधैर्मासं शुनासीरीयेण यद्दर्मासः पूर्यते तदहरिष्टिं समाप्याग्निप्रणयना
दि घर्मोत्सादनादि वौपवसथिकं कर्म कुर्वीश्वोभूते प्रस्तुनुसुत्तद्वे क उपसद्य एवानंतरं कुर्वीति
तथा हि वा तासो त्यान्मासानग्निहोत्रादीन्यदंतस्तदनुपपन्नं पञ्चार्थस्याग्निप्रणयनं तस्य च भ्वः
कृत्यानि भिन्नमतिप्रणीत च र्यायां च वैगुण्यं दर्शपूर्णमासयोस्तथाग्निहोत्रस्य सदोहविर्द्धा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रो·उ·६

३९

नान्याग्नीध्रीयाग्नीषोमप्रणयनं वसतीवरीग्रहणानि पश्चार्थानि भवंतीत्यार्थान्ये केचनत्का
लाश्चैव तद्गुणाः सिद्धस्वभावानां न व्यवधानादन्यत्वं यथाहृष्ट्यामिलवयोः सगुणानां त्वेव
कर्मणां गुह्यास्त्रउपजनो वा स्कन्नब्राह्मण्यात्वयंतमनवध्वतेष्कालसंख्यायत्वादुत्सर्गिमेके स्यात्योप
सद्गुणत्वात्क्रियात्वेव प्रवृत्तेस्यंतमगत्वावस्थानेदोषस्त्रिंशतामासं पंचदशेन मासं सप्तदशेन
मासमेकविंशेन मासं त्रिणवेन मासं समष्टादशत्रयस्त्रिंशानि द्वादशानि द्वादशं हानि महाव्रतं
चातिरात्रश्च सर्वेण यज्ञेन यजंते य एतदुपयंति ॥४॥ सर्पाणामयनं गोआयुषी दशरात्रस्तो
मैः अनुलोमे षण्मासान्प्रतिलोमे षट् ज्योतिर्हृदशस्तोमो विषुवत्स्थाने प्रकाशकामाउपे
युस्त्रैवार्षिकं प्रजाकामा गवामयनं प्रथमः संवत्सरो थादित्यानामथांगिरसां चत्वारिता
पश्चितानि शुल्बकता पश्चितं प्रथमं संवत्सरं सदीक्षोपसत्कं तस्य चत्वारः सोत्या मासां गवा

३९

कं

मयनं ... स्य प्रथमषष्ठसप्तमोत्तमास्त्रैवर्षिंता पश्चितं तस्य सोत्यः संवत्सर उत्को गवामयनेन ज्यो
तिर्गौरायुरभिजिद्विश्वजिन्महाव्रतं चतुर्विंशानां वैकैकं द्वादशवार्षिकं ता पश्चितं तस्य चत्वारः
सोत्याः संवत्सरां गवामयनत्रास्याः पूर्वेणैव न्यायेनां पिवोत्तरस्य पक्षसोद्वाविंशतिः सवन
मासाभवेयुस्त्रयोविंशतिः पूर्वस्य षट्त्रिंशद्वार्षिकं महालाम श्चितं तस्य द्वादशा सोत्याः संवत्स
रांगवामयनत्रास्याः पूर्वेणैव न्यायेन प्रजापतेर्द्वादशसंवत्सरं त्रयस्त्रिंशतः संवत्सरास्त्रयः पं
चदशास्त्रयः सप्तदशास्त्रय एकविंशा एतैरेव स्तोमैः शतं त्यानां षट्त्रिंशद्वार्षिकमेकैकेन न
वनव वर्षाण्येतैरेव स्तोमैः साध्यानां शतसंवत्सरमेकैकेन पंचविंशतिः पंचविंशतिर्वर्षाण्येते
रेव स्तोमैर्विश्वसृजां सहस्रसंवत्सरमेकैकेनार्द्धतृतीयान्यर्द्धतृतीयानि वर्षशतान्यग्नेरग्नि
ष्टोमसहस्रे सहस्रसाव्यमित्याचक्षते ॥५॥ अथ सारस्वतानि सारस्वत्याः पश्चिममुदकांतेदी

त्से

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ·उ·६

४०

स्रेरस्तेतत्रैवदाक्षोपसदः कृत्वाग्रायणाग्रं च सरस्वत्यां दक्षिणेन तीरेण शम्याप्रासे शम्याप्रासेऽ
हरहर्यजमाना अनुव्रजेयुः संहार्यउलूखलबुध्नो यूपश्चक्रीवंति सदोहविर्धानान्याग्नीध्रीयं
पत्नीशालं च दक्षिणपुरस्ताद्दाहवनीयस्यावस्थाय प्रास्तां शम्यां प्रहरेत्सा यत्र निपतेत्तत्र गार्हप
त्यस्यायतनं ततोऽधि विहारो विषमे चेन्निपतेद्द्रुह्य समे विहरेयुः यत्र चेद्वारुणं पुरोळाशं नि
र्वपेयुरपान्नप्त्रे च रूमपां न पादात्यस्का उपरस्तं समन्वायं सुपर्यं सन्याद्द्स्यातः समानं सर्वेषां
मित्रावरुणयोरयनेर्कुज्जपाश्विनामयनस्याद्यान्बणमासानावर्त्तयंतो व्रजेयुर्मासिमासि च
गोश्वावृषभौ उपेयुरायुरकुग्मेषु गोर्युग्मेष्विति नु प्रथमः कल्पोऽथ द्वितीयो यथामावास्यायाम
तिरात्रः स्यात्तथा दाक्षेरस्ते मावास्यायामतिरात्रं संस्थाप्य तदहरेवामावास्यस्य सान्नाय्यव
त्सानपाकुर्युस्तत्पक्षमामावास्येन व्रजित्वा पौर्णमास्यां गामुपेयुः पौर्णमासेनोत्तरं व्रजित्वामावा

४०

स्यायामायुषमुपेयुरेवमावर्त्तयंतो व्रजेयुरिंद्राग्न्योरयनं गोआयुषीभ्यामर्यम्णोयनं त्रिककुद्भैः सरस्व
तीपरिसर्पणस्य शास्यमुक्तं गवामयने नैकपातीनित्वहान्यतिरात्राः एष्याद्श्वतुर्थमिति नु गतयोथो
त्थानानिप्लाक्षं प्रस्रवणं प्राप्योत्थानं तेषु यमुनायां कारपचवं वभ्थमप्युपेयुस्तदेत्याग्नयेकामायेष्टिर्वेदा
जतं त्रातस्यामश्वां च पुरुषी च धेनुकेदग्धुरेत द्वत्थानमपृषभैकशतानां वा गवां सहस्रभावे सर्वस्वज्यान्यां
गृहपतिमरणे वा ज्यान्यां त्वत्तिष्ठतो विश्वजिताऽतिरात्रेणोत्तिष्ठेयुर्गृहपतिमरणमायुषा गवां वा सहस्र
भाव इति शास्यं ॥६॥ अथ सवनीयाः कतुपन्नावोवासं तमाग्नेयो वैंद्राग्नो वाग्नेयं वा रथंतर पृष्ठे वैंद्रं बृ
हत्पृष्ठे वैकादशिनान्वा प्रायणीयोदयनीययोरतिरात्रयोः समस्तानालभेरन्नैंद्राग्नमंतर्द्वैवान्वहं
वैकैकशएकादशिनां नत्वेवैकादशिनीन्यूनामालभेरन्नेतेन चेत्यश्वमने नेयुस्तृतीयेहनि द्वारात्रस्ये
द्वात्रिंशतमेकादशिन्यः संतिष्ठंतेत एतस्मिन्नवरात्रेतिरिक्तपशुनालभेरन्नेवैष्णवं वामनमेकविंशेद्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ·उ·६

४१

ग्नं त्रिणवे वैश्वदेवं त्रयस्त्रिंशे द्यावापृथिवीयां धेनुं चतुर्विंशे तस्या एव वत्सं वायव्यं चतुश्चत्वारिं
शे आदित्यां वशामष्टाचत्वारिंशे मैत्रावरुणीं सविता कैवैश्वकर्मणमृषभं महाव्रते आग्नेय
मुदयनीयेतिरात्रेपि वैकादशिनीमेव त्रयस्त्रिंशे सूर्यस्येयुरभिजिद्विश्वजिद्भ्युवंतिह्निपश्नूनि:
स्युः ॥७॥ अथ सत्रिधर्मा दीक्षणादि पित्र्याणां देवानां च धर्माणामाकृतानां निवृत्तिः सर्वे चाश्व
वर्जयेयुर्ग्रामचर्यासरणं विवृतस्मयनं स्त्र्यभिहासमनार्याभिभाषणमनृतं क्रोधमपां प्रगाह
णमभिवर्षणमारोहणं च वृक्षस्य नावो वा रथस्य वा दीक्षिताभिवादनं दीक्षितस्योपसदमुपोस्म
न्वेतौ समसिद्धान्ता: पूर्वाभिषेणमभितमतरं वा सर्वसाम्य यथावेयान्नृत्यगीतवादितान्यन्यां
श्वाक्रत्योपाचारान्ने चेनान्बहिर्वेदि संदीप्याश्चावयेयुर्नोदक्यान्नो एवाभ्युदियान्नाभ्यस्तमिया
नेषां चेत्किंचिदापदोपनमेत्त्वमग्ने व्रतपा असीति जपेदारव्याय वेतरे भूपहवल्लीमेतावकोणिनिते रे

४१

वदीक्षितद्रव्यैरपर्युप्य पुनर्दीक्षयेयुराग्रयणकाले नवानां सवनीयान्निर्वपेयुर्दीक्षोपसत्सुव्रत
दुघ आदध्येयुस्तेषां व्रत्यानि पयो दीक्षासु व्यतिनीयकालं कुपसदां चतुर्थमेकस्याहुग्धेन तावदे
व त्रिभिस्तनैस्तावद्भ्यामेकेन तावदेवस्कस्यास्मक हविरुच्छिष्टभक्षा एव स्युर्धाना: करम्भः परिवा
पः पुरोळाशः पयस्येति तेषां यद्यत्कामयीरंस्तत्तदुपविगुल्पये युराशिरदुघो दध्यर्थं सौम्यं वा
विगुल्पं निर्वपेयुरिति द्रोणकौयावच्छरावं मन्येरन्वैश्वदेवमेके बार्हस्पत्यमेके सर्वान्वानुस
वनमपि वान्यत्रासिद्धं गार्हपत्ये पुनरधिश्रित्योपव्रतयेरन्नन्यान्वा पथ्यान्भसानामूलफ
लेभ्य एतेन वर्तयेयुः पशुना च ॥८॥ तस्य विभागं वक्ष्यामो हनू सजिह्वे प्रस्तोतुः श्येनं वक्ष
उद्गातुः कण्ठः काकुदः प्रतिहर्तुर्दक्षिणा श्रोणिर्होतुः सव्या ब्रह्मणो दक्षिणं सक्थि मैत्रावरु
णस्य सव्यं ब्राह्मणाच्छंसिनो दक्षिणं पार्श्वं सांसमध्वर्योः सव्यमुपगातॄणां सव्योंसः प्रति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ॰ उ॰ ६

४२

प्रस्थातुर्दक्षिणं दोर्नेष्टुः सव्यं पोतुर्दक्षिण उरुरच्छावाकस्य सव्य आग्नीध्रस्य दक्षिणो बाहुरा
त्रेयस्य सव्यः सदस्यस्य सदं चानूकं च गृहपतेर्दक्षिणो पादो गृहपतेर्व्रतप्रदस्य सव्यो पादो गृ
हपतेर्भार्यायै व्रतप्रदस्यौष्ठ एनयोः साधारणो भवतीति तं गृहपतिरेव प्रशिंष्यात् जाघनीं पत्नीभ्यो
हरंति तां ब्राह्मणाय दद्युः स्कंध्याश्च मणिकास्तिस्रश्च कीकसा ग्रावस्तुतस्तिस्रश्चैव कीकसा
अर्द्धं च वैकर्तस्योन्नेतुरर्द्धं चैव वैकर्तस्य क्लोमा च शमितुस्तद्ब्राह्मणाय दद्याद्यद्यब्राह्मणस्या
च्छिरः सुब्रह्मण्यायै यः श्वः सुत्यां प्राह तस्याजिनमिडा सर्वेषां होतुर्वा ता वा एताः षट्त्रिंश
तमेकपदा यज्ञं वहंति षट्त्रिंशदक्षरा वै बृहती बार्हताः स्वर्गा लोकाः प्राणेषु च स्वर्गेषु
च लोकेषु प्रतितिष्ठंतो यंति स एषः स्वर्ग्यः पशुर्य एनमेवं विभजंत्यथ ये तोन्यथा तद्यथा से
लगा वा पापकृतो वा पशुं विमथ्नीरंस्तादृक्तं तां वा एतां पशोर्विभक्तिं श्रौत ऋषिर्देवभागो

४२

विदां चकार तामु हाप्रोच्यैवास्माल्लोकादुच्चक्राम तामु ह गिरिजाय बाभ्रव्यायामनुष्यः प्रोवा
च ततो हैनामेतदर्वाङ्मनुष्या अधीयते ॥१॥ सर्वे समानगोत्राः स्युरिति गाणगारिः कथं ह्याप्र
सक्ता निभवेयुः कथं प्रयाजाद्यपि नानागोत्राः स्युरिति शौनकस्तत्राणां व्यापित्वात् गृहपतिगो
त्रान्वयाविशेषात्तस्य राद्धिमनुराध्नुः सर्वेषां प्रवरास्त्वावर्तेरन्नावापि धर्मित्वाज्जामदग्ना वत्सा
स्तेषां पंचार्षेयो भार्गवच्यावनाप्नवानौर्वजामदग्नेत्यथ ह जामदग्नानां भार्गवच्यावनाप्नवाने
त्यार्ष्टिषेणानां भार्गवच्यावनाप्नवानार्ष्टिषेणानूपेति बिदानां भार्गवच्यावनाप्नवानौर्वबैदेति
यस्कवाधौलमौनमौकशार्करास्तिसार्ष्टिसावर्णिशालंकायनजैमिनिदैवंत्यायनानां भार्गव
वैतहव्यसावेतसेति त्र्यैतानां भार्गववैन्यपार्थेति मित्रयुवां वाध्र्यश्वेति त्रिप्रवरं वा भार्गवदैवोदास
वाध्र्यश्वेति शुनकानां गृत्समदेति त्रिप्रवरं वा भार्गवशौनहोत्रगार्त्समदेति ॥१०॥ गोतमानामांगि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ०उ०६

४२

रसायास्यगौतमेत्युचथ्यानामांगिरसौचथ्यगौतमेति रहूगणानामांगिरसराहूगण्यगौतमेतिसोम
राजकीनामांगिरससोमराज्यगौतमेति वामदेवानामांगिरसवामदेव्यगौतमेति बृहदुक्थानामां
गिरसबार्हदुक्थ्यगौतमेति पृषदश्वानामांगिरसपार्षदश्ववैरूपेत्यष्टादंष्ट्रं हैके ब्रुवतेऽतीत्यांगिरस
मष्टादंष्ट्र पार्षदश्ववैरूपेत्यृक्षाणामांगिरसबार्हस्पत्यभारद्वाजवांदनमातवचसेति कक्षीवतामां
गिरसौचथ्यगौतमौशिजकाक्षीवतेति दीर्घतमसामांगिरसौचथ्यदैर्घतमसेति भरद्वाजाग्निवे
श्यानामांगिरसबार्हस्पत्यभारद्वाजेति ॥११॥ मुद्गलानामांगिरसभार्म्यश्वमौद्गल्येति तार्क्ष्यं है
के ब्रुवतेऽतीत्यांगिरसं तार्क्ष्यभार्म्यश्वमौद्गल्येति विष्णुवृद्धानामांगिरसपौरुकुत्स्यत्रासदस्यवे
ति गर्गाणामांगिरसबार्हस्पत्यभारद्वाजगार्ग्यशैन्येत्यांगिरसशैन्यगार्ग्येति वा हरितकुत्सपिं
गशंखदर्भभैवगवानामांगिरसांबरीषयौवनाश्वेति मांधातारं हैके ब्रुवतेऽतीत्यांगिरसं मांधा

४२

त्रांबरीषयौवनाश्वेति संकृतिपूतिमाषतंडिशंबुशैवगवानामांगिरसगौरिवीतसांकृत्येति शाक्त्यो
वाम्हलं शाक्त्यगौरिवीतसांकृत्येति ॥१२॥ कण्वानामांगिरसाजमीढकाण्वेति घोरमु हैके ब्रुव
तेऽवक्षष्याजमीढमांगिरसघौरकाण्वेति कपीनामांगिरसामहीयवौरुक्षयसेत्यथ यएते द्वि
प्रवाचना यथैतच्छौंगशैशिरयो भरद्वाजा ह शुंगाः कता शैशिरयस्ते षामुभयतः प्रवृणीते
कमितरतो द्वावितरतो द्वावेतरतस्त्रीनितरतो न हि चतुर्णां प्रवरोऽस्ति न पंचानामतिप्रवरणमां
गिरसबार्हस्पत्यभारद्वाजकात्यात्कीलेति ॥१३॥ अत्रीणामात्रेयार्चनानसश्यावाश्वेति ग
विष्ठिराणामात्रेयगाविष्ठिरपौर्वातिथेति चिकितगालवकालववमनुतंतुकुशिकानां वैश्वा
मित्रदेवरातौदलेति श्रोमतकामकायनानां वैश्वामित्रदेवश्रवसदेवतरसेति धनंजयानां वैश्वामि
त्रमाधुछंदसधानंजय्येत्यजानां वैश्वामित्रमाधुछंदसाज्येति रोहिणानां वैश्वामित्रमाधुछंदस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ॰उ॰६

४४

रौहिणेयस्य ष्टकानां वैश्वामित्रमाधुछंदसाष्टकेति पूरणवारिधापयंतानां वैश्वामित्रदेवरात
पौरणेति कतानां वैश्वामित्रकात्यात्कीलेत्यघमर्षणानां वैश्वामित्राघमर्षणकौशिकेति
रेणूनां वैश्वामित्रगाथिनरैणवेति वेणूनां वैश्वामित्रगाथिनवैणवेति शालंकायनशाला
क्षलोहिताक्षलोहितजह्नूनां वैश्वामित्रशालंकायनकौशिकेति कश्यपानां काश्यपावत
सारासितेति निध्रुवाणां काश्यपावत्सारनैध्रुवेति रेभाणां काश्यपावत्साररैभ्येति शां
डिलानां शांडिलासितदेवलेति काश्यपासितदेवलेति वा ॥१४॥ ॥अथ परशिष्टं॥ ॥
॥ ॥भृगूणां न विवाहोस्ति चतुर्णामादितो मिथः ॥ शेषेतादयस्त्रयस्तेषां विवाहो मि
थ इष्यते ॥१॥ पञ्चानां वै गोतमादीनां विवाहो नेष्यते मिथः ॥ दीर्घतमा औचथ्यः कक्षीवां
श्चैकगोत्रजाः ॥२॥ भरद्वाजाग्निवेश्यरूक्षाः शुंगाः शैशिरयः कताः ॥ एते समानगोत्रा

४४

स्तु गर्गानिकेवदंतिवै ॥३॥ एवं दश्वामुद्गलाविष्णुवृद्धाः कण्वो गस्त्योत्हरितः संकृतिः क
पिः ॥ यस्कश्चैषां मिथ इष्टो विवाहः सर्वैरन्यैर्जामदग्न्यादिभिश्च ॥४॥ यावत्समानगो
त्राः स्युर्विश्वामित्रोनुवर्त्तते ॥ तावद्वसिष्ठश्चात्रिश्च कश्यपश्च पृथक्पृथक् ॥५॥ त्र्या
र्षेयाणां त्र्यार्षेयसंनिपातेऽविवाहः ॥ त्र्यार्षेयाणां पंचार्षेयसंनिपातेऽविवाहः ॥
॥६॥ विश्वामित्रो जमदग्निर्भरद्वाजोथ गोतमः ॥ अत्रिर्वसिष्ठः कश्यप इत्येते सप्त ऋ
षयः ॥७॥ सप्तानामृषीणामगस्त्याष्टमानां यदपत्यं तद्गोत्रमित्याचक्षते ॥८॥ एक
एव ऋषिर्यावत्प्रवरेष्वनुवर्त्तते ॥ तावत्समानगोत्रत्वमन्यत्र भृग्वंगिरसां गणादित्य
समानप्रवरैर्विवाहः ॥९॥ ॥इति परशिष्टं समाप्तं॥ ॥वासिष्ठेति वसिष्ठानां ये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रौ·उ·६

न्यउपमन्युपराशरकुंडिनेभ्यउपमन्यूनौं वासिष्ठाभरद्वस्विंद्रप्रमदेतिपराशराणां वा
सिष्ठशाक्त्यपाराशर्येतिकुंडिनानौं वासिष्ठमैत्रावरुणकौंडिन्येत्यगस्तीनामागस्त्य
दार्ढच्युतेध्मवाहेतिसोमवाहावोत्तमआगस्त्यदार्ढच्युतसोमवाहेतिपुरोहितप्रवरो रा
ज्ञामथ यदि सार्ष्टं प्रवृणीरन्मानवैलपौरूरवसेतीतिसत्राणि तान्यदक्षिणानि ते
षामंते ज्योतिष्टोमः पृष्ठ्यशमनीयः सहस्रदक्षिणोन्यो वा प्रज्ञातदक्षिणो दक्षिणा
वतापृष्ठ्यानि शमयेरन्निति विज्ञायते स एव हेतुः प्रकृतिभावे प्रकृतिभावेन नमो ब्रह्म
णे नमो ब्रह्मणे नम आचार्येभ्यो नम आचार्येभ्यो नमः शौनकाय नमः शौन
काय॥१५॥ ॥ ॥इत्याश्वलायनश्रौतसूत्रे उत्तरषट्के षष्ठोध्यायः॥ ॥ ॥

४५

श्रौ·उ·६

॥इत्याश्वलायनश्रौतसूत्रे उत्तरषट्कः समाप्तः॥ ॥संवत् १८४० आनंदनामसंवत्सरे श्रावणशुक्लैका
दशीभृगुवासरे तद्दिने भडकंबकरोपनामकचिंतामणदीक्षितेन काश्यां विश्वेश्वरसन्निधौ लिखि
तं स्वार्थपरोपकारार्थं च॥ ॥भडकंबकरोपनामकपांडुरंगदीक्षितस्येदं पुस्तकं॥ ॥श्रीरस्तु॥ ॥
॥श्रीकाशीविश्वेश्वरार्पणमस्तु॥ ॥श्रीसीतारामचंद्रार्पणमस्तु॥ ॥

४६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥ इति श्रीतत्त्वसङ्गुत्तरखण्डः समाप्तः॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=19.08.19 12:15
,TRANSFERRED=2019/08/19 at 12:40:30
,PAGES=119
,TYPE=STD
,NAME=S0001496
,Book Name=M-715-SHROTSUTRA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection